एकादश भवन्ति त्रयोदश वा" क॰ । "क्षत्रियपुरोहितव्यतिरिक्तस्य द्वादशीत्रयोदश्याविच्छया भवतः" संग्र॰ "स्वाहाकारः सर्वासूखायाम्" ४४सू॰ । "उखायामाधीयमानासु समित्सु, अतोऽन्यत्रापि स्वाहाकारो भवति सर्वास्वित्यभिधानात्" क॰ । "उखायां सर्वासु समित्सु स्वाहाकारो भवति" संग्र॰ । "औदुम्बर्यादि दण्डान्तमत्रैके" ४५सू॰ । "एवं सति प्रागौदुम्बरीहोमादुखाधिश्रयणादि" 'तान्यु हैक उखायामेवैतान्यौदुम्बराणि जुह्वतीति वचनात्" (६,६,१,२२) क॰ । "अत्रावसरे" संग्र॰ इति ४ कण्डिका ।

"यजमानः कण्ठे रुक्मं प्रतिमुञ्चते परिमण्डलमेकविंशतिपिण्डं कृष्णाजिननिष्यूतं लोमसु शुक्लकृष्णेषु शणसूत्रे त्रिवृत्योतमुपरिनाभि बहिष्पिण्डं दृशानो रुक्म इति"(१२,१) । "रुक्मं हि प्रकृत्य सर्वमेवैतच्छ्रूयते (६,६,१,२), यजमानग्रहणाच्च स्वयमेव यजमानः प्रतिमुञ्चते, द्वादशाहे च सर्वे यजमानाः प्रतिमुञ्चेयुः अत ऊर्ध्वमिण्ड्वाद्यन्वारम्भः एवं हि सर्वैः कृतं भवति" क॰ । "परिमण्डलं वर्तुलम्, एकविंशतिपिण्डम् पिण्डं निर्बाधम् निर्बाध्यन्ते उन्नताः निःकाश्यन्ते उन्नताः स्वरूपाद्बहिर्निःसृता भवन्ति, कृष्णाजिन शुक्लकृष्णेषु लोमसु निष्यूतं नितरां स्यूतम्, पुनः कीदृशम् त्रिगुणे त्रिवृति शणमये सूत्रे ओतं प्रोतम् तथा उपरिनाभि, पुनः बहिष्पिण्डं बहिर्निर्बाधम्" संग्र॰ । "इण्ड्वौ शिक्यासन्दीषु मुञ्जरज्ज्वस्त्रिवृतो मृद्दिग्धाः" २सू॰ उखा याभ्यां गृह्यते तौ इण्ड्वौ, शिक्यं प्रतिद्धम्, आसन्दी च । अनुरक्ता रज्जवो मृद्दिग्धा भवन्ति" क॰ । "मृद्दिग्धाः कर्दमलिप्ताः" संग्र॰ । "परिमण्डलाभ्यामिण्ड्वाभ्यामुखां परिगृह्णाति नक्तोषासेति" (१२, २) ३सू॰ । "हरति द्यावाक्षामेति" (१२,२) ४सू॰ । "तामेवोखाम्" क॰ । "आहवनीयस्य पुरस्तादुद्गात्रासन्दीवदासन्द्यां चतुरस्राङ्ग्यां शिक्यवत्यां निदधाति देवा अग्निमिति (१२,२) ५सू॰ । "उद्गात्रासन्दीवदिति प्रादेशपादी गम्यते" (१२,४,२) क॰ । सा च चतुरङ्गी सह पादैः, तस्यां शिक्यवत्यामासन्द्यां च निदधाति उखाम्" क॰ । "शिक्यपाशं प्रतिमुञ्चते षडुद्यामं विश्वा रूपाणीति" (१२,३) ६सू॰ "ग्रीवायाम्" क॰ । "सशिक्यं प्राञ्चं प्रगृह्णाति सुपर्णोऽसीति" (१२,४) पिण्डवत् ७सू॰। "सह शिक्येन प्राञ्चमग्निं प्रगृह्णाति, पिण्डवदित्यूर्ध्वबाहुः (२,९) । "धारणं च" ८सू॰ । "पिण्डवदेव उपरिनाभि" क॰ । अत्र द्वाभ्यामङ्काभ्यां शुक्लयजुर्वेदस्याध्यायादि, त्रिभिरङ्कैः कात्यायनश्रौतसूत्रस्याध्ययकण्डिकादि । चतुर्भिरङ्कैः शतपथब्राह्मणस्याध्यायादि ज्ञेयं तेन तत्तत्प्रतीकमात्रगृहीतमन्त्रसूत्रादि तत्तत्स्थाने द्रष्टव्यम् विस्तरस्तु शत॰ ब्रा॰ ६ अ॰ द्रष्टव्या । लौकिकेष्टरचितप्राचीरादौ इष्टकाघनफलेन इष्टकासंख्याज्ञानोपायो दर्शितो लीला॰ यथा "चितौ करणहस्तं सार्द्धहस्तम् । उच्छ्रयेण गुणितं चितेः किल क्षेत्रसम्भवफलं घनं भवेत् । इष्टकाघनहृते घने चितेरिष्टकापरिमितिश्च लभ्यते ॥ इष्टकोच्छ्रयहृदुच्छ्रितिश्चितेः स्युःस्तराश्च दृषदां चितेरपि ॥ उदाहरणम् । अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुलः । उच्छ्रितिस्त्र्यङ्गुला यासामिष्टकास्ताश्चितौ किल ॥ यद्विस्तृतिः पञ्चकराष्टहस्तं दैर्घ्यं च यस्यां त्रिकरोच्छ्रितिश्च । तस्यां चितौ किं फलमिष्टकानां सङ्ख्या च का ब्रूहि कति स्तराश्च ॥ इष्टकायाः घनहस्तमानम् ३/२६ चितेः क्षेत्रफलम् ४० । उच्छ्रयेण ३गुणितं चितेर्घनफलम् १२० । यथोक्तकरणे लब्धा इष्टका सङ्ख्या २५६० । स्तरसङ्ख्या २४ । एवं पाषाणचयेऽपि" 'व्यासात् षोडशभागः सर्वेषां सद्मनां भवति भित्तिः । पक्वेष्टकाकृतानां दारुकृतानां च स विकल्पः । वृ॰सं॰। "नेष्टकारचिते पितॄन् संतर्पयेत्" शङ्खलि॰ । "मृण्मयात् कोटिगुणितं फलं स्याद्दारुभिः कृतात् । कोटिकोटिगुणं पुण्यं फलं स्यादिष्टकामये" मठ॰त॰ पु॰ । वास्तुयागे 'आकाशपदे' इष्टकारोपाचारः वास्तु यागशब्दे द्रष्टव्यः ।

**इष्टकाचयन** न॰ इष्टकयाऽग्नेश्चयनम् । इष्टकया अग्नेश्चयने तत्प्रकारः कात्या॰श्रौ॰सू॰।"एतया विकृत्याभिमन्त्र्य केऽन्यचितं चिन्वन्ति द्रोणचिद्रथचक्रचित्कङ्कचित्प्रउगचिदुभयतःप्रउगः समुह्य पुरीषः" १६,५,९ । "एते ह्यग्निविशेषाः तदाकारांश्चिन्वन्त्येके एके सुपर्णचितम् विलिङ्गत्वादस्या विकृतेरग्न्यन्तरेष्वप्राप्तिर्मा भूदित्युच्यते एवं हि श्रूयते "तं हैक एतया विकृत्याभिमन्त्र्यान्यां चितिं चिन्वन्तीति" (६,७,२,८ शत॰ब्रा॰) क॰। "विकृत्या एतया ऋचा अन्यचितं षड्विधमन्यमग्निं चिन्वन्ति तमेवाह द्रोणचिदित्यादि" संग्र॰। "समुह्य पुरीषे प्रतिदिशं पुरीषाहरणम्" १० सू॰ । प्रतिदिशं पुरीषमाहृत्याहृत्य तेनैव चयनम्" क॰ । "विष्णुक्रमान् क्रमते विष्णो-